अथ प्रसङ्गात् धारणासरस्वतीमन्त्रोऽपि लिख्यते—

अनिराकरणऋषिः। अनुष्टुप्छन्दः। धारणासरस्वती देवता।

ध्यानम्— सुरासुरासेवितपादपङ्कजा करे विराजत्कमनीयपुस्तका।
विरिञ्चिपत्नी कमलासनस्थिता सरस्वती नृत्यतु वाचि मे सदा॥

(ओं) नमो ब्रह्मणे धारण मे अस्त्वनिराकरणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं माच्योढ्वं ममामुष्य ओं। इति मन्त्रः। अनेन जलादिप्राशनं सारस्वतप्रदम्। इदमपि प्रसङ्गाल्लिख्यते—

नकुलीसरस्वतीमन्त्रस्य ब्रह्माऋषिः। गायत्रीछन्दः। नकुलीसरस्वतीदेवता॥

विकासभाजि हृत्पद्मे स्थितामुल्लासदायिनीम्।
परवाक्स्तम्भिनीं नित्यां स्मरामि नकुलीं सदा॥

ऐं ओष्ठाभिधाना नकुली दन्तैः परिवृता पविः। क्लीं सर्वस्यै वाच ईशाना चारु मामिह वादयेत् सरः सौः क्लीं ऐ॥ इति मन्त्रः॥ मन्त्रैः व्यस्तैस्समस्तैश्च पञ्चाङ्गानि। अनेन मन्त्रेण दन्तेष्वेकैकमक्षरं अंगुष्ठेन क्रमेण न्यसेत्। वादसामर्थ्यं भवेत्॥

अथ तत्प्रसङ्गादेव कल्पान्तरोक्तः परासरस्वतीमन्त्रोपि लिख्यते— ब्रह्मा ऋषिः। गायत्री छन्दः। परासरस्वती देवता। सौः हृत्। सौः शिरः। इत्याद्यङ्गानि। ध्यानम्—

अकलङ्कशशाङ्काभा त्र्यक्षा चन्द्रकलावती।
मुद्रापुस्तलसद्बाहा पातु मां परमा कला॥

सौः। इति मन्त्रः। सारस्वतफलप्रदः॥